परामर्शकोड ग्रंथसंख्या २५० पत्रसंख्या १०

॥१॥ श्रीगणेशायनमः॥ पर्वतधर्मिकवह्न्नुमितिप्रतिवह्निव्याप्यधूमवान्पर्वतइतिपर्वतवि
शेष्यकवह्निव्याप्यधूमप्रकारकनिश्चयः॥ वह्निव्याप्योधूमः पर्वतइतिआधेयतासंबंधेनप
र्वतप्रकारकवह्निव्याप्यधूमप्रकारकनिश्चयश्च हेतुः॥ तयार्थाद्धिपर्वतंविशेष्यकवह्निव्याप्य
धूमप्रकारकनिश्चयेनवह्निव्याप्यधूमविशेष्यकाधेयतासंबंधेनपर्वतप्रकारकनिश्च
यत्वेनपृथक्पृथक्कारणत्वे लिङ्गविशेष्यकपरामर्शोव्यर्थः॥ केवलानुमितौपक्षविशे
ष्यकव्याप्यप्रकारकनिश्चयेव्यभिचारः एवंपक्षविशेष्यकपरामर्शजन्यानुमितौलिङ्ग-
विशेष्यकपरामर्शस्यकारणत्वेव्यभिचारः अतएवविशेष्यकसाध्यव्याप्यप्रकारकनि
श्चयोत्तरानुमितिप्रतिलक्षणपरामर्शत्वेनकारणत्वं॥ एवंव्याप्यविशेष्यकप्रकारकनि पक्ष
श्चयोत्तरानुमितिप्रतिव्याप्यविशेष्यकपक्षप्रकारकनिश्चयत्वेनकारणत्ववक्तव्यं॥ तथा
चकार्यतावच्छेदककोटौव्याप्यप्रकारतानिरूपितपक्षविषयतायाः॥ कारणतायावच्छे
दककोटौचस्याः प्रवेशः॥ एवंपक्षप्रकारतानिरूपितव्याप्यविषयतायाश्चप्रवेशेगौ शिवः
रवमतेव्याप्यतावच्छिन्नविषयतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयताशालिनि
श्चयोत्तरानुमितिप्रतिव्याप्यतावच्छिन्नविषयतानिरूपितपक्षतावच्छेदकावच्छिन्नविषय ॥१॥

तारालिनिश्चयत्वेनैकरूपेणानुमितिहेतुत्वमतएवव्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्च
यत्वावच्छिन्नकारणतानिरूपितकार्यतायाघटितत्वेनानुमितिलक्षणेधीवृत्तिरू
तास्वीकृतेऽनन्यथासंयोगसंबंधावच्छिन्नव्याप्यत्वेनगृहीतधूमस्यसमवायेनधू
मावयवेपरामर्शसंयोगेनधूमावयववह्नेरनुमितिनुसाधतेयत्संबंधावच्छिन्नय
दभिव्याप्यत्वंतदवच्छिन्नतत्संबंधावच्छिन्नविषयतानिरूपितपक्षतावच्छेदकावच्छि
न्नविशेषतारालिनिश्चयत्वेनकारणत्वमेवश्यंवक्तव्यं।तथाचयेधाव्यधूमःपर्वतइतिपरा वह्नि
मर्शीयवह्निव्याप्यधूमत्वावच्छिन्नविशेष्यतायाव्याप्यतावच्छेदकीभूतसंयोगसंबं
धावच्छिन्नत्वविरहात्कथंपक्षविशेष्यकपरामर्शलिङ्गविशेष्यकपरामर्शयोरेकरू
पणहेतुत्वमितिवाच्यं।हेतुतावच्छेदकसंबंधानवच्छिन्नप्रकारतानिरूपितायाव्याप्य
तावच्छिन्नविषयतानिरूपितायाहेतुतावच्छेदकसंबंधावच्छिन्नाधेयत्वसं
बंधानवच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयतात्वरूपविषय
तारालिनिश्चयत्वेनानुमितिप्रतिहेतुत्वाभ्युपगमेदोषाभावकाराः।वह्निव्याप्यधूमा

)(२)(पर्वतइतिज्ञानीयकालिकसंबंधावच्छिन्नप्रकारतायाहेतुतावच्छेदकसंबंधानवच्छि
न्नप्रकारतायेनावह्नित्वव्याप्यधूमः पर्वतवानितिज्ञानीयकालिकसंबंधावच्छिन्नप्रका
रतायाःसंयोगसंबंधावच्छिन्नाधेयत्वसंबंधानवच्छिन्नप्रकारतायेननिरूक्तज्ञानेन
तादृशानुगतधर्मानाक्रांतत्वेननतादृशज्ञानत्वयादृनुमित्यापत्तिः)(संयोगसंबंधा
वच्छिन्नवह्नित्वव्याप्यधूमप्रकारकपर्वतविशेष्यकज्ञानीयपर्वतनिष्ठविषयतायाहेतु
तावच्छेदकसंबंधावच्छिन्नाधेयत्वसंबंधानवच्छिन्नत्वेपि)(प्रकारतात्वविरहेणहेतुता
वच्छेदकसंबंधावच्छिन्नाधेयत्वसंबंधानवच्छिन्न प्रकारताभिन्नत्वमक्षतमेव)(वच्छेदक
एवंवह्नित्वव्याप्यधूमःपर्वतइतिज्ञानीयधूमनिष्ठविशेष्यतायाहेतुतासंबंधस्य
चिन्नत्वपिप्रकारतात्वविरहेण)(पक्षविशेष्यकपरामर्शत्वेनविशेष्यकपरामर्श
योःसंग्रहेणनचैवमपिवह्नित्वव्याप्यधूमवान्पर्वतवान्देशइतिज्ञानीयपर्वतनि
ष्ठप्रकारतात्वविरोक्तयोरेकोनहेतुतावच्छेदकसंबंधावच्छिन्नाधेयत्वसंबंधान
वच्छिन्नतादृशप्रकारत्वस्यतादृशज्ञानीयपर्वतनिष्ठविशेष्यतायासत्वात्तादृशज्ञा शिवः
नस्यानुगमानाक्रांतत्वेनतादृशज्ञानत्वेनानुमितेरनुपपत्तिरितिवाच्यं)(अन्तराभा)(२)(

समानपदार्थनिष्ठप्रकारतावि[शे]ष्यतयारेक्यस्वीकारेवह्निव्याप्यधूमवत्पर्वतवा
नित्यनुमितिज्ञानीयवह्निव्याप्यधूमपर्वतत्व एतदुभयधर्मावच्छिन्नपर्वतप्रकारता
एववह्निव्याप्यधूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतात्मवपर्वत
त्वप्रकारतानिरूपितत्वेनपर्वतप्रकारतानिरूपितवह्निव्याप्यधूमावच्छिन्नविशे
ष्यतापत्तिः॥ एवंपर्वतत्वप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यता
पत्तिः॥ एवंवह्निव्याप्यधूमप्रकारतानिरूपितवह्निव्याप्यधूमावच्छिन्नविशेष्य
तापत्तिश्चातोऽवच्छेदकतानामकवह्निव्याप्यधूमप्रकारतानिरूपितपर्वतत्व
वच्छिन्नायकाविशेष्यतापरिचतादृशविशेष्यतावच्छिन्नादृवह्निव्याप्यधूमपर्वत
त्वोभयधर्मावच्छिन्नप्रकारतास्वीकर्त्तव्येति॥तज्ज्ञानीयपर्वतनिष्ठविशेष्यतायां
हेतुतावच्छेदकसंबंधावच्छिन्नाधेयसंबंधेनावच्छिन्नप्रकारतासन्निवेशेन तादृशा
ज्ञानानुमितिप्रसूतेवा॥वस्तुतस्तुमुख्यविशेष्यकपरामर्शादेवानुमितिर्नतुन्या
य्यविशेष्यकपक्षप्रकारादितिमताभिप्रायेणेदं॥एतेनवह्निव्याप्यधूमवत्पर्वतवा
नित्यनुमितिज्ञानीयपर्वतनिष्ठविशेष्यतायांवह्निव्याप्यधूमप्रकारतानिरूपितत्वेनैव

एवंवह्निव्याप्यधूमःपर्वताभाववानितिज्ञानस्यप्रतिबंधकतापत्तिःतादृशज्ञान
स्यपर्वतप्रकारतानिरूपितवह्निव्याप्यविशेष्यताशालित्वात्॥

(३)। पर्वतत्वावच्छिन्नत्वेनतुवह्निर्व्याप्यधूमप्रकारतानिरूपितविशेष्यतावत्त्वेन
वह्निव्याप्यधूमावच्छिन्नत्वं किन्तुप्रकारतात्वेनैवोभयधर्मावच्छिन्नसमता।
नुस्मारणप्रकारतावि[illegible]तेयारक्यपिनस्यस्य धर्मितावच्छेदकतापत्तिनिबंधनो
दोषः॥ इतिनिरुक्तानुगमेतादृशज्ञानस्यासंग्रहइतिप्रयुक्तं।केचित्तु
हेतुतावच्छेदकसंबंधावच्छिन्नव्याप्यप्रकारतानिरूपितायाहेतुतावच्छेदकसं
बंधावच्छिन्नाधेयत्वसंबंधावच्छिन्नाधेयत्वसंबंधानवच्छिन्नाप्रकारताहेतुतावं
छेदकसंबंधावच्छिन्नातादृग्वस्यपविषयतायांसानिवेशात्।नवह्निव्याप्यधूम
वत्पर्वतवानेशइतिज्ञानस्यतत्राभासमानपदार्थनिष्प्रकारतत्वविशेष्यतयारक्ये
पिनासंग्रहः।तदीयपर्वतनिष्प्रकारतायाःसंयोगसंबंधावच्छिन्नवह्निव्याप्यप्र
कारतानिरूपितत्वंहेतुतावच्छेदकसंबंधावच्छिन्नव्याप्यप्रकारतानिरूपिता
त यात्रप्रकारतातादृग्वस्यग्राह्यत्वात्।एवंव्याप्यतावच्छिन्नविषयतायामपिहेतु
तावच्छेदकसंबंधावच्छिन्नाधेयत्वसंबंधानवच्छिन्नपक्षप्रकारतानिरूपितायां
हेतुतावच्छेदकसंबंधानवच्छिन्नप्रकारतातादृग्वेनिवेशनीयं। अन्यथासंयोग
पक्ष संबंधावच्छिन्नाधेयत्वसंबंधेनप्रकारक व्यवानकालइतिज्ञानस्यासं [illegible]

संग्रहश्लोकः॥ ननु पर्वतो वह्निव्याप्यवत्त्वसंशयानुमितिवारणाय पर्व
तत्वावच्छेदेन वह्निव्याप्यधूमाभावप्रकारतावत्त्वे सति पर्वतधर्मिकवह्निव्याप्यधू
मप्रकारकत्वरूपं निश्चयत्वे अनुमितिजनकतावच्छेदकं वक्तव्यं॥ एवं वह्निव्याप्यधू
मः पर्वतनवत्तिसंशयानुमितिवारणाय व्याप्यधर्मिकपक्षाभावाप्रकारक
त्वसत्तिव्याप्यधर्मिकपक्षप्रकारकत्वअनुमितिजनकतावच्छेदकं वक्तव्यं॥ तथा
चकथंपक्षविशेष्यकपरामर्शयोरेकरूपहेतुत्वं॥ नचप
क्षतावच्छेदकावच्छेदेनव्याप्याभावप्रकारकत्वविशिष्टयद्व्याप्यविशेष्यकाधेयत्वं
धावच्छिन्नप्रतियोगिताकपक्षाभावाप्रकारकं व्याप्यतावच्छिन्नविषयतानिरूपि
तपक्षतावच्छेदकावच्छिन्नविषयतावत्त्वेन हेतुत्वान्नोक्तसंशयानुमि
त्यापत्तिरितिवाच्यं॥ एवमपिपर्वतत्वसामानाधिकरण्येन वह्निव्याप्यधूमाभा
वाव गाहिपर्वतत्वावच्छेदेनवह्निव्याप्यधूमावगाहिपर्वतावह्निव्याप्यधूमवत्
वृत्तिसंशयानुमित्यापत्तिस्तादवस्थ्यात्॥ नचपर्वतधर्मिकवह्निव्याप्याधूमाभाव

प्रकारकत्वमवच्छेदकं विशेषणीयं॥ तथाच पर्वतत्वसामानाधिकरण्येन वह्निव्याप्यधू-
माभावावगाहिपर्वतत्वावच्छेदेन वह्निव्याप्यधूमावगाहि संशयपर्वतधर्मिक
वह्निव्याप्यधूमाभावाप्रकारकत्वविरहान्नतादृशसंशयादनुमितापत्तिरिति वा
च्यं॥ एवंसतिपर्वतत्वसामानाधिकरण्येन वह्निव्याप्यधूमावगाहि पर्वतत्वसामान-
धिकरण्येन वह्निव्याप्यधूमाभावावगाहि निश्चयादनुमित्यनुपपत्तिस्तस्यपर्वतध
र्मिकवह्निव्याप्यधूमाभावाप्रकारकत्वविरहादितिचेदुच्यते॥ ॥ पर्वतत्वावच्छेदेन
वह्न्यनुमितिप्रतिपर्वतत्वावच्छेदेनवह्निव्याप्यधूमवत्तानिश्चयः॥ कारणंपर्वतत्व
सामानाधिकरण्येन वह्निव्याप्यधूमपरामर्शस्तत्वावच्छेदेनानुमितेरस्वीका
रात्॥ पर्वतत्वसामानाधिकरण्येन वह्न्यनुमितिप्रतिपर्वतत्वसामानाधिक
रण्येनवह्निव्याप्यवत्तानिश्चयकारणे॥ एवञ्चपर्वतत्वावच्छेदेनवह्न्यनुमितिप्रति
पर्वतत्वव्यापकवह्निप्रतियोगिकव्याप्यधूमप्रतियोगिकसंयोगसंबंधावच्छि
न्नप्रकारतानिरूपितपर्वतत्वव्यापकतादृशसं-
योगसंबंधावच्छिन्नविधेयतानिरूपितपर्वतत्वव्यापकतादृशसंबंधावच्छिन्नप्रकारत्वाभिन्नपक्षता शिवः
वच्छेदकावच्छिन्नविषयताशालिनिश्चयनिष्ठकारणतायांपर्वतधर्मिकवह्नि ॥४॥

व्याप्यधूमाभावप्रकारकत्वमवच्छेदकं॥ एवं वह्नियाप्यधूमत्वावच्छिन्नधर्मिकता दृशा
धेयतासंबंधावच्छिन्नपर्वताभावप्रकारकत्वमप्यवच्छेदकं॥ पर्वतत्वसामानाधिक
रण्येनवह्नियाप्यधूमवत्ताज्ञानसाधा
रणकारणतायांतुपर्वतत्वावच्छेदेनवह्नियाप्यधूमाभावांप्रकारकत्वमवच्छेदकमि
त्तिनपर्वतत्वसामानाधिकरण्येनवह्नियाप्यधूमतदभावावगाहिनिश्चयादनुमि
त्यनुपपत्तिरितिकेचित्॥ हेतुतावच्छेदकसंबंधावच्छिन्नाधेयतासंबंधानवह्नि
व्याप्यधर्मिकवह्नियाप्यधूमःपर्वतवह्नियाप्यधूमाभाववांश्चपर्वतइतिस
म्हालम्बनज्ञानस्यपर्वतत्वावच्छेदेनवह्नियाप्यधूमाभावप्रकारकत्वनिश्चयानु
पपत्तिरितितादृशपरामर्शादनुमित्यनुपपत्तिः॥ प्राचीनमतेपर्वतत्वावच्छेदेन
वह्नियाप्यधूमाभावत्ताबुद्धिंप्रतिवह्नियाप्यधर्मिकंसंयोगसंबंधावच्छि
नाधेयतासंबंधेनपर्वतप्रकारकनिश्चयस्यापिकार्यतदभावेनप्रतिबंध
कतयातादृशज्ञानस्याहार्य्यत्वेनानुमितिजनकतावच्छेदकीभूतालार्य्यता
नाक्रांततयातादृशज्ञानादनुमितापत्तिविरहइतिः॥:॥ केचिन्तुहेतुता

वच्छेदकसंबंधावच्छिन्नाधेयतासंबंधावच्छिन्नप्रतियोगिताकपक्षाभावप्रकारतानिरूपिता
याव्याप्यत्वावच्छिन्नविषयतानिरूपिताया हेतुतावच्छेदकसंबंधावच्छिव्याप्याभावप्रकारता
निरूपितपक्षतावच्छेदकावच्छिन्नविषयतातादृशविषयतावशालिज्ञानत्वेनकारणत्वं।।सं
शयेचप्रकारतादृयनिरूपितेकाविरोधिता।तथाचपर्वतोवह्निव्याप्यधूमवान्नवेति
संशयेयापक्षतावच्छेदकावच्छिन्नविषयतासान्यव्याप्याभावप्रकारकत्वानिरूपितत्व
वह्निव्याप्यधूमः।।पर्वतेक्षेनवेतिसंशयेचयातादृशधूमत्वावच्छिन्नविषयतासानपक्षा
भावप्रकारत्वानिरूपिततितादृशसंशययोनिश्चयहेतुत्वंपूर्वकत्वेपर्वतधर्मिक
वह्निव्याप्यधूमाभावप्रकारत्वंवह्निव्याप्यधर्मिकाधेयत्वसंबंधावच्छिन्नप्रतियोगिताक
पक्षाभावप्रकारत्वयोरेकज्ञानेविरोधेतयाविरोध्यविरोधभावेविनिगमनाविर
हात्।गुरुतरकार्यकारणभावद्वयापत्तिरतस्तादृपक्षयापर्वतधर्मिकवह्निव्याप्या
भावप्रकारकत्वविशिष्टपर्वतधर्मिकवह्निव्याप्यप्रकारकज्ञानत्वेनवह्निव्याप्यध
र्मिकपक्षाभावाप्रकारकत्वविशिष्टव्याप्यधर्मिकप्रक्षाभावप्रकारकज्ञानत्वेनत्वहेतु
त्वकल्पनएवलाघवमिनकोपिदोषः।।नचुपनीतिवह्निव्याप्यधूमवान्नइदंतानंवह्निव्या
प्यधूमाभाववतिवह्निव्याप्यधूमाभावप्रकारकमितिअप्रामाण्यज्ञानस्कृतंपरामर्शं

पर्वतेवह्न्यनुमितिवारणाय॥ एवं वह्निव्याप्यधूमः पर्वतेरतिज्ञानंअधेयतासंबंधा
वप्रतियोगिताकपर्वताभाववतितेनसंबंधेनपर्वतप्रकारकमिदंप्रामाण्यज्ञानास्कं
दितव्याप्यविरोध्यकपरामर्शोदनुमितिवारणायतादृशप्रामाण्यज्ञानाभावदेयं॥
व्याप्यतावच्छेदकावच्छिन्नविषयतानिरूपितप्रकारतावच्छेदकावच्छिन्नविषयतायाहिनि
श्चयनिष्ठप्रकारतायांअवच्छेदकमवश्यंवक्तव्यं॥ तथाचतेनाविरोध्यविरोधेन
भावेनविनिगमनाविरहादुक्तरकार्यकारणभावक्लृप्तमवश्यं॥ एवंपर्वतोवह्नि
व्याप्यधूमवानइदंज्ञानमाधेयतासंबंधावच्छिन्नप्रतियोगिताकपर्वताभाववतितेनसं
बंधेनपर्वतप्रकारकमिदंप्रामाण्यज्ञानास्कंदितपरामर्शात्॥ वह्निव्याप्योधूमःपर्वते
इदंज्ञानंवह्निव्याप्याभाववतिवह्निव्याप्यप्रकारकमिदंप्रामाण्यज्ञानास्कंदितपराम
र्शाच्चसर्वानुभवसिद्धायाअनुमितेरपलापप्रसङ्गान्नेयंयद्यदंप्रामाण्यज्ञानसत्वे
पर्वतधूमिकवह्न्यनुमितेरसौदस्तित्वेदंप्रामाण्यज्ञानाभावसमवकारणतावच्छेद
कतयानिरूक्ताप्रामाण्यज्ञानाभावानांकारणतावच्छेदकोयंप्रविष्टोनतत्रानु
मितनुपपत्तिरितिवाच्यं॥ यत्रवह्निव्याप्यधूमवान्पर्वतइदंज्ञानमाधेयतासं

६।। स्वधावच्छिन्नप्रतियोगिताकपर्वताभाववतितेनसंबंधेनपर्वतप्रकारकंभाविज्ञानं
तादृशमेवाभाविज्ञानश्चवह्न्यभाववतिवह्निप्रकारकंवह्निव्याप्योधूमःपर्वतव्याप्य
वानितिसहालम्बनपरामर्शोतदुत्तरंपर्वतोवह्निमान्वह्निव्याप्योधूमःपर्वतइति
सहालम्बनानुमितिस्तदुत्तरंपुनर्वह्न्यनुमितिप्रसङ्गः।।नचपर्वतधर्मिकवह्न्यनुमिति
प्रतिसिद्धप्रतिबंधकतायांसिद्धिस्वरूपानुमितिधर्मिकतादृशसामान्यज्ञानव्यक्तेरुत्ते ज
कतास्वीकारात्सिद्धिरूपप्रतिबंधकवशान्नोक्तक्षणेऽनुमितापत्तिरितिवाच्यं।।एवमपि
यत्रासामान्यव्याप्यवत्ताज्ञानरूपासामान्यपरामर्शात्वह्न्यनुमितिधर्मिकासामान्य
ज्ञानानन्तरंतादृशस्थलीयवह्न्यनुमितिस्तदुत्तरक्षणेऽसामान्यज्ञानानास्कंदितपरा
मर्शस्ततोऽनुमितिर्नस्यात्सिद्धिरूपप्रतिबंधकस्यसत्वात्परामर्शक्षणसत्वादतस्तदसा म
मान्यज्ञानस्यसिद्धावुत्तेजकत्वमवश्यंवक्तव्यं।।तथाचययोःपरामर्शोतरक्षणेऽनुमि
तिर्जायतेतथापरामर्शंपरीक्ष्यवह्न्यनुमितिःकथंनजायतेप्रत्यक्षात्मकपरामर्शसा
मग्र्यपेक्षयाश्रिन्नविषयकसामग्र्यैवलघुत्वादितिचेन्न।।वह्न्यभाववद्भिन्नत्वव शिवः
वच्छिन्नवह्निव्याप्यत्वप्रकारतानिरूपितउभयवृत्तिधर्मावच्छिन्नज्ञाननिष्ठ ।।६।।

विशेष्यताकज्ञानाभाव विशिष्टयाव्याप्यत्वावच्छिन्नविषयतानिरूपितायापक्षा
भावावच्छिन्नविशेष्यकत्वावच्छिन्नपक्षप्रकारकत्वप्रकारतानिरूपितउभयावच्छिधर्मावच्छि
न्नज्ञाननिष्ठविशेष्यकज्ञानाभाव विशिष्टयापक्षतावच्छेदकावच्छिन्नविषयतातादृशवि
षयतायाश्लिङ्गज्ञानत्वेन हेतुत्वस्योक्तत्वात्।।व्याप्यत्वावच्छिन्नविषयतायातादृशाभावाश्र
यनिरूपितविशेष्यताश्रय निरूपित निरूपितविशेष्यतानिरूपितप्रकारत्वत्वाव
च्छिन्नविषयतानिरूपितव्याप्तित्वावच्छिन्न विषयतानिरूपितवह्नित्वावच्छिन्नविषयता
वच्छेदकवह्नित्वावच्छिन्नविषयतानिरूपितव्याप्तित्वावच्छिन्नविषयतानिरूपित तस्य
धावच्छिन्नप्रतियोगिताकः।।एवतादृशज्ञानाभावः स्वज्ञाननिरूपित तस्त्वीय प्रकार
त्वावच्छिन्नविषयतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयतावच्छेदकपक्षतावच्छेदका
वच्छिन्नविषयतानिरूपितप्रकारतात्वावच्छिन्नविषयताश्रयीभूतप्रकारितानिरूपकत्व
एतदुभयसंबंधावच्छिन्नप्रतियोगिताकः।।एवञ्चावह्नित्वव्याप्यधूमः पर्वतेइदंज्ञानंवह्नित्वव्याप्यभा
ववतिवह्नित्वव्याप्यप्रकारकमिथ्याप्रामाण्यज्ञानास्पदीभूतपरामर्शादनुमितिनिवर्तिका तथा
विधतादृशप्रामाण्यज्ञानस्य विरोधीभूतयद्वह्नित्वव्याप्यधूमःपर्वतेइत्याकारकज्ञानंतन्नि

रूपितत्वस्य तज्ज्ञानीयव्याप्यतावच्छिन्न विशेष्यतायांसत्वेपि तादृशप्रामाण्यज्ञानीयप्रका
रकत्वावच्छिन्नविषयतानिरूपितव्याप्तिज्ञानावच्छिन्न विषयतानिरूपित विषयता वच्छेदकीभूत
वह्नित्वावच्छिन्नविषयतानिरूपितप्रकारकत्व ज्ञानावच्छिन्नविषयता श्रयीभूतप्रकारिनिरू
पकत्वस्य तत्रनिवहान्निरूपक त्वाभेदसंबंधावच्छिन्न प्रतियोगिताक निरूक्तप्रामाण्य
ज्ञानाभाव वत्वं तत्राक्षतमेव ज्ञानभेदेन च विषयताभेदमतेभयंपरिकारः ॥ ::>::) ॥ नतु
समानाकारकज्ञानीयैक विषयता मते तथा सतिवह्नि व्याप्य धूमवान्पर्वतइत्ज्ञानं वह्नि
व्याप्यधूमाभाववतिवह्नि व्याप्यधूमप्रकारक मिसप्रामाण्यज्ञानास्कंदित परामर्शीयाया
विषयतातस्या एवाप्रामाण्यज्ञानस्कंदित तादृशपरामर्शाय तयाच प्रामाण्यज्ञानास्कं
दितज्ञानीयव्याप्यत्वावच्छिन्न विषयता मपि निरूक्ता प्रामाण्यज्ञान विशेषीभूतपराम
र्शोनिरूपितत्व घटितोभयसंबंधेना प्रामाण्यज्ञानत्वादप्रामाण्यज्ञानास्कंदित पराम
र्शतिरंअप्रामाण्यज्ञानानास्कंदित परामर्शोहनुमिसभावापत्तेः ॥ एवंप्रकारेणेज्ञा
नंपक्षाभाववतिपक्षप्रकारमिसप्रामाण्य ज्ञानास्कंदित वह्नि व्याप्यधूमप्रकारकपर्व
तविशेष्यकपरामर्शोहनुमिति निर्वाहः ॥ ::>::) ॥ नचस्वविशेष्यीभूतज्ञानेनिरूपितत्वी
यप्रकारकत्वावच्छिन्नविषयताश्रयीभूतप्रकारितानिरूपकत्वंएतदुभयसंबधोव

छिन्नप्रतियोगिताकसामान्याभावस्वरूपमेव व्याप्यतावच्छिन्नविषयनिरूप
तांकिंगुरुतरसंबंधावच्छिन्नप्रतियोगिताकाभावनिवेशेनेतिवाच्यं॥एवंसतिव
ह्निव्याप्यधूमवान्पर्वतइत्याकारंवह्निव्याप्याधूमाभाववतिवह्निव्याप्यधूमप्रकारकमि
त्यसामान्याभावस्वरूपमेववह्निव्याप्यतावच्छिन्ननिरूपितप्रकारितयानज्ञानान्तरीयप्रकारि
तामवगाह्यतंतादृशासामान्याभावंस्वीकृतपरामर्शात्सर्वानुभवसिद्धानुमितिरनुप
पन्नापद्येत॥तादृशज्ञानीयप्रकारितावच्छिन्नप्रकारिताश्रयीभूतज्ञानांतरी
यप्रकारितानिरूपितत्वस्यपरामर्शीयविषयतायांविरहात्॥एवंचेदंज्ञानंपक्षाभाव
वतिपक्षप्रकारकमिसासामान्याभावस्यनिरुक्तसंबंधावच्छिन्नप्रतियोगिताकत्व
व्याप्तिःस्वयमूहनीया॥अत्रेयमवधेयं॥वह्निव्याप्यधूमवावच्छिन्नविषयतानिरूपित
पर्वतनावच्छिन्नविषयताशालिनिश्चयोत्तरंपर्वतधर्मिकवह्न्यनुमितिप्रतितादृशनिश्चय
त्वेनहेतुत्ववह्निव्याप्यधूमप्रकारकपर्वतविशेष्यनिश्चयोत्तरानुमितिजायतामितीच्छा
तःपर्वतेसिद्धिसत्वेतादृशपरामर्शादेवपर्वतेवह्न्यनुमितिर्जायतेनतुवह्निव्याप्य
विशेष्यपर्वतप्रकारकनिश्चयादितिनियमानुपपत्तिः॥तथाहितादृशेच्छाविरह

।।८।। विशिष्टसिद्धभावस्य कार्यतावच्छेदकं यद्धि पर्वतधर्मिकवह्निव्याप्यधूमप्रकारकनिश्च
यात्तरानुमितिहेतुतत्तादृशवह्निव्याप्यधूमः पर्वतेऽस्तिनिश्चयास्तु निरूक्तसिद्धभाव
श्चपर्वतेनपुनर्वह्निव्याप्यधूमवान्पर्वतइतिपरामर्शस्तस्यापिपर्वतधर्मिकवह्निव्या
प्यधूमवत्तानिश्चयोत्तरानुमितित्वावच्छिन्नस्यनिरूक्तसिद्धभावबलादापत्तिर्दुर्वारै
व ।। यद्धिपर्वतधर्मिणिवह्निव्याप्यधूमवत्तानिश्चयोत्तरपर्वतधर्मिकवह्न्नुमिति
त्वावच्छिन्नं प्रतिपर्वतधर्मिकवह्निव्याप्यधूमवत्तानिश्चयोत्तरानुमितिर्जायतामि
त्याकारकेच्छाविरहविशिष्टपर्वतधर्मिकवह्निनिश्चयाभावत्वेनैककारणत्वं।।वह्नि
व्याप्यधर्मिकाधेयतासंबंधेनपर्वतप्रकारकनिश्चयोत्तरपर्वतधर्मिकवह्न्नुमि
तिप्रतितादृशनिश्चयोत्तरामितित्वप्रकारकेच्छाविरहविशिष्टसिद्धभावत्वेनका
रणत्वमपरं।।तदाशयकेवलावह्निव्याप्यधूमवान्पर्वतइतिपरामर्शोवर्त्ततेसिद्धि
श्चतात्तितद्धेतुकपक्षतादृश्यस्यसत्वात्सत्ताबधेदकीभूतवह्निव्याप्यधूमत्तानिश्च
योत्तरानुमितित्वावच्छिन्नंप्रतिव्याप्यधर्मिकपक्षप्रकारकनिश्चयोत्तरानुमिति
त्वावच्छिन्नस्यापत्तिर्दुर्वारैवतादृशपक्षतादृश्यसत्वात्।।तादृशतावच्छेदकंवह्नि

कार्यता

नस्योपादानस्य सुवचत्वादत एव सिद्धुत्तरानुमितिप्रतिसिषाधयिषायाः कारणत्वं सिषाधयि
षावर्त्ततेसिद्धिर्नास्तितत्रापिसिषाधयिषारूपकारणबलात्सिद्धुत्तरानुमितित्वावच्छिन्ना
पत्तिमथुरानाथोक्तक्रमात्सिद्धुत्तरानुमितिप्रतिसिद्धरयिहेतुत्वमुक्तातादृशापत्तिर्वा
रिता॥एवञ्चपक्षतायाइवपराहत्यापिपर्वतधर्मिकवह्न्यादिव्याप्यधूमवत्तानिश्चयोत्तरानु
मितित्वावच्छिन्नंप्रतितादृशनिश्चयत्वेनैकंहेतुंव्याप्यधर्मिकपक्षप्रकारकनिश्चयोत्तरा
नुमितिप्रतितादृशनिश्चयत्वेनापरंहेतुंएवञ्चैकविधपरामर्शसत्त्वेऽन्यविधपक्षता
बलान्नान्यविधानुमितित्वावच्छिन्नापत्तिः॥एवंविधपक्षतायांअन्यविधपरामर्शस्यसह
कारित्वादेवञ्चमथुरानाथानव्याप्यत्वावच्छिन्नविषयतानिरूपितपक्षतावच्छेदकावच्छि
न्नविषयतशालिनिश्चयोत्तरानुमितित्वावच्छिन्नप्रतितादृशनिश्चयत्वेनैकरूपेणकार
णत्वमुक्तं॥तत्तस्यगुरुणामिवनव्याप्यनामपिप्रतनानुमितिहेतुरितिकेवलान्वयिग्रं
थोक्तलिखनानुसारणशेषमशेषनव्यमतवादार्थेऽनुसंधेयं॥:::॥:::॥नैयायिक
मतेव्याप्यत्वावच्छिन्नविषयतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयतानिरूपितपक्ष
तावच्छेदकावच्छिन्नविषयतशालिनिश्चयत्वेनकारणत्वं॥मीमांसकमतेतुहेतुतात्व

छेदकावच्छेदव्याप्तिनिश्चयत्वंहेतुतावच्छेदकरूपेणपक्षधर्मतानिश्चयत्वेश्यदंडसंयोगत्व
वकारणतावच्छेदकंतन्मतेकारणतावच्छेदकलाघवात्सम्मवेपियत्रवह्निव्याप्यधूमःधूम
वान्पर्वतइतिज्ञानंतदुत्तरंलिंगपरामर्शप्रतिबंधकंवाज्ञानपर्वतोवह्निमानियनुमि
ति॥किन्तुवह्निव्याप्यधूमवान्पर्वतइतिपरामर्शःतत्रमीमांसकमतेसिद्धकारणतावच्छे
दकहयस्यस्वप्रकारावाहितप्रथमोपस्थितित्वरूपलाघवसम्मवाहितिमथुरानाथः
नोक्तं॥:::॥अत्रेदंकिन्तुस्वप्रकारावाहितेवह्निव्याप्यधूमइतिज्ञानकालेधूमे
वह्निव्याप्तिंजानामीत्युत्तरंव्यवसायोनियमतोजायतेविषयग्राहकसामग्र्याविषय
पुरस्कारेणज्ञानग्राह्यग्राहकत्वनियमात्॥नतुतादृशज्ञानकालेधूमव्याप्तिंनिश्चिनोमी
त्याकारकानुव्यवसायः॥व्याप्यभावप्रकारकत्वविशिष्टव्याप्तिप्रकारकज्ञानत्वपर्यवस
न्नस्यव्याप्तिप्रकारकंतव्याप्यभावप्रकारकत्वंवैशिष्ट्यंग्राहकसामग्र्याअतिरिक्तयापक्ष
णीयंतत्॥तथाचव्याप्यभावप्रकारकत्वंविशिष्यंसामग्रीनास्तिकिन्तुव्याप्यभावप्र
कारत्वंवैशिष्ट्यसामग्रीवर्तेतत्रवह्निव्याप्यधूमवान्पर्वतइतिज्ञानकालेधूमवह्नि
व्याप्तिंनिश्चिनोमीत्यनुव्यवसायोनजायतेकिन्तुवह्निव्याप्तिंनिश्चिनोमीत्यनुव्य
वसायः॥तथागुरुविनायीकसिद्धकारणतावच्छेदकस्यप्रथमोपस्थितित्वंसम्मतमिति ॥९॥

ध्यय॥:::::॥ यद्वा ज्ञानार्थविशेष्यकयदर्थप्रकारकप्रत्यक्षप्रमितिप्रत्यनुभवत्वव्याप्य
जातिवच्छिन्नकार्यतानिरूपितताद्दात्म्यसंबंधावच्छिन्नकारणता भयते सतिस्वभि
न्नमानोभिन्नप्रमाणजन्यवृत्तिप्रत्यक्षत्वव्याप्यजातिवच्छिन्नकार्यतानिरूपितकारणता
श्रयीभूतंयद्व्यक्तितत्तद्ज्ञानार्थविशेष्यकतदर्थप्रकारकप्रमायाःकारणंभवतीतियासि
द्धशरीरंदृष्टान्तश्चाक्षुषइति॥ तथाचघटविशेष्यकघटत्वप्रकारकप्रत्यक्षप्रमितिवृत्तिरनु
भवत्वव्याप्यजातीयाचाक्षुषत्ववच्छिन्नकार्यतानिरूपितताद्दात्म्यसंबंधावच्छिन्न
चाक्षुषत्वावच्छिन्नकारणवंचक्षुषवर्त्ततेएवंचक्षुभिन्नमनोभिन्नप्रमाणंयत्प्राणस्थिं
तजन्यवृत्तिप्रत्यक्षत्वव्याप्ययत्प्राणजत्वंतद्वच्छिन्नकार्यतानिरूपितकारणतानाश्र
यवंचतत्रास्तीतत्रघटविशेष्यकघटत्वप्रकारकप्रमायाःकारणत्वंस्यादस्ति॥ व्या
प्तिस्मरणरूपोपनयस्यव्याप्तिकारकप्रत्यक्षत्वावच्छिन्नकारणवंयद्दिनेयापिकेःस्वी
क्रियतेतदाव्याप्तिस्मरणेपिपर्वतविशेष्यकवह्नियाप्यप्रत्यक्षानुमितिप्रतिबंधकता
विशिष्टप्रतिबध्यतावच्छेदकस्यज्ञेयविषयतायांविवक्षितत्वात्॥ वैशिष्ट्यंचनि
रूपितत्वंचनिरूपकतावच्छेदकतयाभयसंबंधेन॥ एवंच्छेदकत्वंघटकसंबं

धश्च स्वविशिष्टप्रकारता वह्नेरूपः॥ स्वविशिष्टत्वंप्रकारतायां स्वावच्छेदकप्रकारतावच्छेदध
र्मावच्छिन्नत्वस्यावच्छेदकविशेष्यताश्रयव्यापकप्रतियोगितावच्छिन्नसंसर्गिकावच्छेदकता
निरूपितोभयसंबंधेन॥ प्रकारतावत्श्चस्यावच्छिन्नप्रतिबंधकतानिरूपितप्रतिब
ध्यताभाववद्वृत्तिसंबंधेन॥ एवञ्चद्रव्यधर्मिकवह्नभावव्याप्यविषयकज्ञाननिष्ठा
याप्रकृतानुमितिनिष्ठप्रतिबंधकतानिरूपितप्रतिबध्यतातस्यांतादृशप्रतिबंधकता
निष्ठावच्छेदकताकभेदवत्वंतादृशाधिनः॥ तद्वच्छेदकताधारकस्यतादृशप्रतिबंध
कताविशिष्टोवह्निमानितिज्ञानीयप्रकारतानिरूपितस्वावच्छिन्नप्रतिबंधकतानिरूपि
तप्रतिबध्यताभाववद्वृत्तिरूपसंबंधस्यवर्त्तमानत्वेनासतादृतिव्याप्तिरक्षायाञ्च
नवकाशात्॥ श्रीगजाननार्पणमस्तु॥ छ॥ श्रीभद्रकालियैनमः॥ श्रीरामायनमः॥॥
शके १७७८ प्रभवनामसंवत्सरे कार्तिकशुक्लपंचम्यांभानुवासरे मिदं पुस्तकं लि
खकरकरसहस्रिवशास्त्रियोचेभस॥ पत्राणि १० ग्रंथसंख्या ९० शुभंभवंतु॥ छ॥

शिवः